# Jagannatha Ashtakam

कदाचित्-कालिंदी तटविपिन संगीतकरवो
मुदाभीरी नारीवदन कमलास्वादमधुपः ।
रमा शंभु ब्रह्मामरपति गणेशार्चित पदो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ 1 ॥

भुजे सव्ये वेणुं शिरसि शिखिपिंछं कटितटे
दुकूलं नेत्रांते सहचरकटाक्षं विदधते ।
सदा श्रीमद्वृंदावनवसतिलीलापरिचयो
जगन्नाथः स्वामी नयनपथगामी भवतु ने ॥ 2 ॥

महांभोधेस्तीरे कनकरुचिरे नीलशिखरे
वसन् प्रासादांतस्सहज बलभद्रेण बलिना ।
सुभद्रा मध्यस्थस्सकलसुर सेवावसरदो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ 3 ॥

कृपा पारावारास्सजल जलद श्रेणिरुचिरो
रमावाणी रामस्फुरदमल पंकेरुहमुखः ।
सुरेंद्रैराराध्यः श्रुतिगणशिखा गीत चरितो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ 4 ॥

रथारूढो गच्छन् पथि मिलित भूदेवपटलैः
स्तुति प्रादुर्भावं प्रतिपदमुपाकर्ण्य सदयः ।
दयासिंधुर्बंधुस्सकल जगता सिंधुसुतया
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ 5 ॥

eAstroHelp
Your Happiness Helpline

परब्रह्मापीडः कुवलय-दलोत्फुल्लनयनो
निवासी नीलाद्रौ निहित-चरणोऽनंत-शिरसि ।
रसानंदो राधा-सरस-वपुरालिंगन-सखो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ 6 ॥

न वै याचे राज्यं न च कनक माणिक्य विभवं
न याचेऽहं रम्यां निखिलजन-काम्यां वरवधूम् ।
सदा काले काले प्रमथ-पतिना गीतचरितो
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ 7 ॥

हर त्वं संसारं द्रुततरमसारं सुरपते
हर त्वं पापानां विततिमपरां यादवपते ।
अहो दीनोऽनाथे निहितचरणो निश्चितमिदं
जगन्नाथः स्वामी नयनपथगामी भवतु मे ॥ 8 ॥

जगन्नाथाष्टकं पुन्यं यः पठेत् प्रयतः शुचिः ।
सर्वपाप विशुद्धात्मा विष्णुलोकं स गच्छति ॥

इति श्रीमद् शंकराचार्यविरचितं जगन्नाथाष्टकं संपूर्णं॥

eAstroHelp
Your Happiness Helpline